MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

A Critical Reflection on the Mystery of Cosmogony in Vedic Philosophical Hymns

वैदिकदार्शनिकसूक्तग्रथितो जगत्सृष्टिविषयकरहस्यविमर्शः

Abhirup Choubey

Ph.D. Research Scholar
Dept. of Sanskrit, Pali & Prakrit
Visva Bharati University, Santiniketan, West Bengal, India.
Email: abhirupchoubey01@gmail.com
Page No: 120-124

Abstract: *Since antiquity, humanity has contemplated fundamental inquiries: How did this vast cosmos originate? What existed prior to the manifestation of the universe? The profound answers to these inquiries surging in the minds of the ancient sages (ṛṣis) are preserved in the philosophical hymns (dārśanika-sūktas). The cosmological hymns primarily constitute these philosophical hymns. The Ṛgveda preserves numerous such hymns, among which the Hiraṇyagarbha-sūkta, Devī-sūkta, Puruṣa-sūkta, and Nāsadīya-sūkta are preeminent.*

The primary objective of this research paper is to critically analyze the discourse surrounding universal creation presented within these Vedic texts. In Vedic literature, one finds an exceptionally profound and scientific delineation of the origin of the cosmos and its intrinsic mysteries. This study rigorously investigates the theories of cosmogony propounded across hymns like the Nāsadīya-sūkta, Puruṣa-sūkta, and Hiraṇyagarbha-sūkta.

Where modern science endeavors to decipher the genesis of the universe through models such as the Big Bang Theory, the Vedic seers thousands of years ago systematically expounded cosmic manifestation through the principles of Ṛta (cosmic order) and the disruption of equilibrium in primordial matter (mūlaprakṛti). This research paper demonstrates that Vedic cosmogony is not merely mythological imagination, but a high-level cosmology rooted in acute philosophical and scientific discernment.

Keywords: *Vaidikasṛṣṭivijñānam, Nāsadīyasūktam, Puruṣasūktam, Hiraṇyagarbhaḥ, Ṛta, Mūlaprakṛtiḥ.*

भूमिका —

विश्ववाङ्मये वैदिकवाङ्मयस्य स्थानमतीव महत्त्वपूर्णमस्ति। चतुर्ष्वपि वेदेषु ऋग्वेदो मुख्यो विद्वद्भिः मन्यते। सोऽयम ऋग्वेदो दश मण्डलेषु विभक्तो वर्तते। दशसु मण्डलेषु विभिन्नानां देवानां स्तुतयः सन्ति। स्तुतिप्रधानदेव अत्र सूक्तविभागो वर्तते। तदनु सम्पूर्णे ऋग्वेदे अष्टाविंशत्यधिकमेकसहस्रसंख्याकानि सूक्तानि द्विपञ्चाशदुत्तरपञ्चशताधिक-दशसहस्रऋचः सन्ति। सूक्तेष्वेषु एकादश सूक्तानि खिलसूक्तनाम्ना प्रसिद्धानि सन्ति येषु अशीति ऋचः सन्ति। दशमे च मण्डले एकनवत्युत्तरशतं सूक्तानि सन्ति। ऋच्यते स्तूयते यया सा ऋक्, तादृशीनामृचां समूह एव ऋग्वेदः। यत्रार्थवशेन पादव्यवस्था सा ऋक् इति मीमांसकाः। चतुर्षु वेदेषु ऋग्वेदस्य महत्त्वमितरस्मादस्ति। ऋग्वेदो हि धार्मिकस्तोत्राणामेको विशालनिधिः। अत्र बहुभिः ऋषिभिः विविधैः भावभव्यैः शब्दैः विभिन्नाः देवाः सादरं स्तुताः भवन्ति। पाश्चात्यानां मते भावयाः भावस्य च विचारेण अन्येभ्यो वेदेभ्य अतीवप्राचीनोऽस्त्ययम्ऋग्वेदः। भारतीयदृष्ट्या ऋक्संहितायाः अभ्यर्हितत्वं पूजनीयता च सर्वत्र स्वीकार्यमस्ति।

मानवचिन्तनस्य प्रभातवेलायाम् एव 'अस्य दृश्यमानस्य जगतः मूलं किम्?', 'कथम् अस्य ब्रह्माण्डस्य आविर्भावः अभवत्?', 'सृष्टेः प्राक् किम् आसीत्?' इत्यादयः जिज्ञासाः मानव चेतसि समुत्पन्नाः। भारतीयवाङ् मये अस्याः परमजिज्ञासायाः विशुद्धम्, उत्कृष्टम्, अतिगभीरं च समाधानं वैदिकसूक्तेषु समुपलभ्यते। वेदसंहिताः, विशेषतः ऋग्वेदस्य दशममण्डलस्य सूक्तानि, केवलम् ईश्वरस्तुतिपरकाणि न भूत्वा ब्रह्माण्डविद्यायाः (Cosmology) दार्शनिकतत्त्वमीमांसायाः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

(Metaphysics) च परममुच्चादर्शं प्रस्तौति।

वैदिक-ऋषयः जगदुत्पत्तिं केवलाम् एकां पौराणिकीं कथां न मन्यन्ते, अपि तु एतां निरतिशयस्य परमचैतन्यस्य परिणामात्मिकाम् अभिव्यक्तिं मन्यते। ऋग्वेदस्य नासदीयसूक्ते, पुरुषसूक्ते, हिरण्यगर्भसूक्ते देवीसूक्ते च अस्याः सृष्टेः गूढतमं रहस्यं प्रतिपादितम् अस्ति। यत्र नासदीयसूक्तं सृष्टेः प्राक्तनं शून्यवद् अनिर्वचनीयं स्वरूपं स्पृशति, तत्र पुरुषसूक्तं विराट्-पुरुषस्य मानस-यज्ञेन सर्वजगतः उत्पत्तिं दर्शयति, हिरण्यगर्भसूक्तं च प्रथमं प्रकाशमयम् एकाकि-बीजं सृष्टेः आधारत्वेन प्रतिष्ठापयति।

पुरुषसूक्ते जगत्सृष्टिविषयकमतम् :

ऋग्वेदस्य दशममण्डलस्य नवतितमसूक्तं पुरुषसूक्तम् भारतीयवैदिकसृष्टिविज्ञानस्य दार्शनिकचिन्तनस्य च आधारशिला अस्ति। अस्य सूक्तस्य ऋषिः नारायणः। सूक्तेऽस्मिन् षोडशः मन्त्राः विद्यन्ते। सूक्तमिदं दार्शनिकसूक्तं यतः सूक्तेऽस्मिन् सृष्टिप्रक्रियायाः विवरणमस्ति।

अत्र सकृत् पुरुषस्य विवरणमस्ति यस्य सहस्रशीर्षः, सहस्राक्षः सहस्रपादाश्च सन्तीति। इदृशेण पुरुषेण जगतादि आवृतम्। जगतः वहिः अपि तस्य विचरणोऽस्ति। स पुरुषः जगदाधिपतिः। जगदोपरि तस्य प्रभावः सर्वाङ्गीनरूपेण सम्पूर्णरूपेण च वर्तते। न केवलमस्मिन् जगति अपि तु जगतः वहिः सर्वत्रैव तस्याधिपत्यं विराजते। पुरुषस्यास्य विवरणरूपेण उक्तम् ऋषिणा—

"सहस्रशीर्षा पुरूषः सहस्राक्षः सहस्रपात्
स भूमिं विश्वतो वृत्वात्यतिष्टद्दशाङ्गुलम् ।।" (ऋग्वेद १०/९०/०१)

अस्मात् पुरूषात् विराट्नामाख्यः ब्रह्माण्डशरीरः जातः। उत्पन्नः ब्रह्माण्डशरीर आदिपुरूषः नाम्ना ख्यातः। तदन्तरं जाता पृथिवी जातश्च मनुष्यशरीरः। अथ देवेभिः यज्ञः संघटितः, यज्ञस्यास्य हविः आसीत् प्रथमोत्पन्नः पुरूषः। यज्ञोऽयं सर्वहुतयज्ञः नाम्ना ख्यातः। तस्मात् यज्ञात् पयश्च आय्यश्च जातौ। अनन्तरं अरण्याणि सम्भूतानि अरण्यपशवाश्च जाताः। अथ जातः ऋचादयः अर्थात् ऋक्-साम-यजुः-छन्दश्च जाताः। ऋषिणा उक्तम्—

"तस्मात् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि यज्ञिरे तस्माद्यजुस्तस्मादजायत ।।"(ऋग्वेद १०/९०/०९)

अथ घोटकादयः गव्यादिपशवः छागाः मेशाः च जाताः। न केवलं घोटकादयः पशवः। अपितु पुरूषादस्मात् ब्राह्मणादेः चतुर्वणस्य उद्भवः इति ऋषेः मतम्। यज्ञादुद्भूतस्य पुरूषस्य मुखात् ब्राह्मणः जातः वाहुद्वयात् क्षत्रियः ऊरूद्वयात् वैश्यः पादद्वयाच्च शूद्रः जातः इति पुरूषसूक्तस्य मतमिति —

"ब्राह्मणोऽस्य मुखमासीत् वाहु राजन्यः कृतः
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रोऽजायत"।। (ऋग्वेद १०/९०/१२)

यो प्रथमोत्पन्नः विराटपुरूषः स एव हिरण्यगर्भः स ब्रह्मा स हि प्रजापतिः। ब्राह्मणः प्रजापतेः मुखात् सम्भूत इत्यादिविवरणात् अनन्तरं सूर्य-चन्द्रादीनाम् सम्भावनमत्र विवृयते। पुरुषसूक्ते मानवसमाजः अपि तस्यैव विराद्पुरुषस्य शरीररूपेण कल्पितः अस्ति। अत्र समाजस्य चतुर्वर्णाः शरीरस्य अङ्गरूपेण वर्णिताः सन्ति।

मुखम् — ज्ञानस्य, शिक्षणस्य, आध्यात्मिकधैर्यस्य च प्रतीकः ब्राह्मणः।
बाहू — रक्षणस्य, सम्प्रभुतायाः, शौर्यस्य च प्रतीकः क्षत्रियः (राजन्यः)।
ऊरू — व्यापारस्य, कृषि-पशुपालनादेः, पोषणस्य च प्रतीकः वैश्यः।
पद्भ्याम् — समस्तसमाजस्य आधारभूतसेवाद्याः, श्रमस्य च प्रतीकः शूद्रः।

सूर्यचन्द्रादीनामुत्पत्तिः :

सर्वहुतयज्ञस्य हविस्वरूपस्य विराटपुरूषस्य प्रजापतेः वा मनसः चन्द्रः जातः चक्षोः जातः सूर्यः। तस्य मुखात् इन्द्राग्निः

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

अजायतः, प्राणात् वायुः अजायतः।

"चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत।

मुखादिश्चन्द्राग्निश्च प्राणाद्वायुरजायत।।" (ऋग्वेद १०/९०/१३)

विराटपुरूषस्य नाभिप्रदेशात् अन्तरीक्षः शीर्षदेशात् द्युलोकं चरणात् भूमिः च श्रवणात् दिशश्च अजायन्तः इति ऋषेः मतम्—

"नाभ्या आसीदन्तरीक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्।।" (ऋग्वेद १०/९०/१४)

अनेन प्रकारेण जगति मनुष्य-पश्वादि-चन्द्र-सूर्य-द्युलोकादेः आविर्भावः इति पुरूषसूक्तस्य मतम्।

नासदीयसूक्ते जगदुत्तिविषयकमतम् :

ऋग्वेदस्य दशममण्डलस्य ऊनत्रिंशत्याधिकशतसूक्तं हि नासदीय सूक्तम्। सूक्तेऽस्मिन् सप्तमन्त्राः वर्तन्ते , यत्र जगत्सृष्टिविषयकदार्शनिकभावः परिदृश्यते। अस्य सूक्तस्य प्रथममन्त्रे ऋषिणा उक्तम्— जगतः सृष्टेः प्राक् कस्यापि अस्तित्वं नासीत्। नासीत् च आकाश-वायुः इत्यादयः तदा केवलं घनान्धकाररूपं जलम् आसीत्। ऋषिणा उक्तम्—

"नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो वोम्नोपरो यत्

किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्।।" (ऋग्वेद १०/१२९/०१)

ऋषिणा पुनरुक्तं — तदा मृत्युः नासीत् न वा अमरत्वमासीत्, पृथिव्यामस्यां प्राणादि नासीत् न च देवतायाः अस्तित्वम। दिवारात्रं च तदा न प्रकटिते। आसीत् तदा केवलमनादीप्रकृतिः। तत्काले अन्धकाराच्छन्नात् प्रकृतिर्नामनादिपदार्थात् सम्भूतः परमात्मा रचयिता वा। ऋषिणा उक्तम् —

"तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।

तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ।।"(ऋग्वेद १०/१२९/०३)

अस्मात् परमात्मनः सृष्टिविषयकः कामः अजायत । ततः उद्भुतः सृष्टेः प्रथमम् वीजम्। परमात्मनः उद्भुतः रश्मयः चतुर्दिशि व्याप्तोऽभवन्। सूर्यकिरणसदृशेण रश्म्या सह अनादिप्रकृतिर्संयुक्तं भूत्वा सृष्टिरभवत् इति ऋषेः मतम्। ऋषिणा पुनः इदमपि उक्तं को जानाति अस्य जगतः सृष्टिरहस्यम्। कोऽपि न जानाति इति भावोऽत्र ।

सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वमिदं जगत् अज्ञानरूपेणान्धकारेणावृतमासीत् अर्थात् सर्वत्र तमसा आच्छादितम् अप्रकेतं नामरूपादिभिविशेषताभिर्विरहितं शून्यमिव अप्रज्ञायमानं सलिलम् अत्र सर्वत्र व्याप्तमासीत्। यदिदं जगत् प्रलयकाले तुच्छ्येन शून्यसदृशेन अतिसूक्ष्मेन आभुना "आ समन्तात् भवतीत्याभु" भावरूपेणाज्ञानेन अपिहितम् आच्छादितम् आसीत्। तत् एकीकृतं कारणेन तमसा अविभक्तं सत् परतत्त्वस्य तपसः सङ्कल्परूपतपसः महिम्ना माहात्म्येन सामर्थ्येन वा विविधरूपैः सह अजायत उत्पन्नम् इति।

हिरण्यगर्भसूक्ते सृष्टिरहस्यम् :

हिरण्यगर्भसूक्तम् ऋग्वेदस्य दशममण्डलस्य एकविंशत्याधिकशतं सूक्तम्। अस्य सूक्तस्य ऋषिः हिरण्यगर्भः देवता च प्रजापतिः। सूक्तेऽस्मिन् दशः मन्त्राः वर्तन्ते। तत्र सृष्टिविषयकरहस्यं विद्यन्ते। तत्र प्रथमसूक्ते ऋषिणा उक्तम् यत् – हिरण्यगर्भः नाम एकः देवः आदौ अवर्तत। स देवः सर्वेषाम् अधिपतिभूत्वा स्वर्गलोकं पृथिवीलोकं च अधारयत्। अतएव 'क' आख्य अस्यै देवतायै हविषाविधानं कुर्यादिति –

"हिरण्यगर्भसमवर्ततात्रे भूतस्य जातः पतिरेकः आसीत्

स दाधार पृथिवीं द्यमुतेमां कस्मै देवाय हविषा विधेम।।"(ऋग्वेद १०/१२९/०१)

स हिरण्यगर्भ हि प्राणीनामन्नदाता वलदाताश्च। तस्य छाया हि अमृतं तस्य छाया मृत्युरपि च। अन्यानः देवाः तामनुसरन्ति इति। स हिरण्यगर्भः आत्मनः महिम्ना सर्वेषां प्राणीनां अर्थात् द्विपद-चतुष्पदां प्राणीनाम् तथा निमिषतोप्राणीनां च प्रभुरभवत्।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

तस्य महीम्ना नदीनां समुद्रानां च उत्पत्तिरभवत्। प्रदिशः तस्य वाहुस्वरूपः। समुद्राः हिमवन्तश्च तेन महिम्ना उद्भूताः। समुद्राः हिमवन्तश्च तस्य माहात्म्यं कीर्त्यन्ति इति भाव। स द्युलोकं पृथिवीलोकं च असृजत्। तस्य प्रभावेन स्वर्गलोकं स्तभितः। स हि अन्तरीक्षलोके रजसः जलस्य वा परिमापकर्ता अर्थात् मेघात् वृष्टिदाता। द्युलोकं पृथिवीलोकं च हिरण्यगर्भः किमर्थसृजत् इति प्रश्नो भवितुर्महति तस्योत्तररूपेण ऋषिणा उक्तम् – रेजमाने दीप्यमीने वा पृथिवीलोकं रेजमाने, प्राणीनां धारणार्थमसृजत् च स देवः। सूर्यश्च अस्मिन् हिरण्यगर्भे उदेति प्रकाशितश्च इति ऋषेः मतम् —

"यं क्रन्दसी अवसा तस्तभाने
अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति।"(ऋग्वेद १०/१२१/०६)

स हिरण्यगर्भ हि विषयादि जगदुत्पत्तेः प्राक् विपुलजलराशिं गर्भे धारणं कृतम् तदनन्तरं देवादीनां सर्वेषां प्राणीनां प्राणभूतः एकः प्राणः प्रजापतिः समजायत एव । ऋषिणा उक्तम् —

"आपो ह यद्वृहतीर्विश्वमाय गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः।"(ऋग्वेद १०/१२१/०७)

आत्मनः महिम्ना स हिरण्यगर्भः जलराशिं पर्यपश्यत् अपि तु तस्मात् जलराशेः यज्ञमपि असृजत्। स हि हिरण्यगर्भः यः देवानामधीश्वरः।

"यश्चिदापो महिना पर्यपश्यत् अक्षं दधाना जनयन्तीर्यज्ञम्
यो देवेष्वधि देव एक आसीत्।" (ऋग्वेद १०/१२१/०८)

एतादृशात् हिरण्यगर्भनामकात् देवात् पृथिवी-अन्तरीक्षलोक–तोयराशि-चन्द्र-नक्षत्रादिश्च उद्भुताः। स हि जगतः जनिता जनयिता वा —

"मा नो हिंसीज्जनिता यः पृथिव्या।" (ऋग्वेद १०/१२१/०९)

अतएव हिरण्यगर्भसूक्तानुसारेण हिरण्यगर्भनामकः देवः हि अस्य जगतः, चन्द्र-सूर्य-नक्षत्राणां तथा जलानामपि च अग्नेःप्राणादीनां च उत्पत्तेः कारणम्। स हि जगतः अधिष्ठाता। स हि द्युलोक-भूलोकानां धारणकर्ता पालनकर्ता च इति।

देवीसूक्ते सृष्टिरहस्यम् :

ऋग्वेदस्य दशममण्डलस्य पञ्चविंशत्याधिकशतं सूक्तं देवीसूक्तम्। सूक्तस्यास्य ऋषिः वागाम्भृणिः देवता च परमात्मा। सूक्तेऽस्मिन् अष्टमन्त्राः वर्तन्ते। सूक्तेऽस्मिन् जगतः कर्तारूरेण आत्मणः स्वरूपम् अप्रकाशयत् देवी वाक्। तयोक्तं — सा हि जगतः कर्ता भोक्ता इत्यादयः। अन्तिममन्त्रे ऋषिणा उक्तम् सा हि विश्वभुवनं सृष्ट्वा वायुरूपेण प्रवहतीति, सा हि पृथिवीलोकात् द्युलोकात् च वहिः अवस्थानं करोति इति। ऋषिणा उक्तम् —

"अहमेव वातइव प्र वाम्यारभमाणा भूवनानि विश्वा
परो दिवा पर एना पृथिव्यैतावती महिना संवभूव।" (ऋग्वेद१०/१२५/०८)

आम्भृणिवाक् रुद्रैकादशभिः सह अष्टवसुभिः सह च आदित्यगणेन सह तथा विश्वदेवगणेन सह च सा विचरति इति। सा हि मित्रावरुणौ अश्विनीकुमारद्वयं च धारयति इति तस्याः मतम्। न केवलं मित्रावरुणादयः अपि तु सोम-त्वष्टा-पूषण-भग-यजमानान् धारयति इति। सा हि वसूनां संमयित्री तथा धनोपासकानां धनदात्री च। तस्याः प्रभावेन जनाः पश्यन्ति शृन्वन्ति अन्नमत्ति च। सा हि आकाशस्य जनिता इत्यादयश्च वाक्ऋषेः मतम्। सूक्तेऽस्मिन् नारीऋषिवागाम्भृणिणा अनेन प्रकारेण जगत्सृष्टेः प्रकारं वर्णयति ऋग्वेदे।

उपसंहृतिः —

यद्यपि वेदेषु सृष्टिविषयकानि विविधानि मतानि सन्ति। नासदीयसूक्ते परमात्मनः जगत्सृष्टिरभवत् इति मतमस्ति। हिरण्यगर्भसूक्ते अस्ति हिरण्यगर्भः जगत्सृष्टेः प्राक् कालादवर्तत। स हि जगतः कर्ता, प्राणीनामन्नदाता, वलदाता, स हि द्युलोकं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

पृथिवीलोकं च असृजत्। पर्वतः समुद्रादयः तस्य माहात्म्यं कीर्त्यन्ति इति। वैदिकसूक्तेषु ग्रथितः जगत्सृष्टिविषयकः रहस्यविमर्शः भारतीयदार्शनिकचिन्तनस्य उत्तुङ्गं शिखरम् अस्ति। एतेषु सूक्तेषु न केवलं सृष्टेः उत्पत्तेः बाह्या व्याख्या कृता, अपितु तस्याः मूलस्य परब्रह्मणः, प्रकृतेः, आत्मनश्च सूक्ष्मः सम्बन्धः उद्घटितः।

नासदीयसूक्तम् ऋग्वेदस्य दार्शनिकमुकुटमणिः अस्ति। एतत् सूक्तं न केवलं सृष्टेः रहस्यात्मकं वर्णनं करोति, अपितु मानवबुद्धेः सीमां स्वीकुर्वन् परममन्वेषणं निरूपयति। आधुनिक-भौतिकविज्ञाने 'सिंगुलारिटी' (Singularity) तथा ब्रह्माण्डस्य उत्पत्तेः पूर्वव्यवस्थायाः यत् वर्णनं क्रियते, तस्य बीजरूपं नासदीयसूक्ते पूर्वमेव साक्षात्कृतम्।

हिरण्यगर्भसूक्तं वैदिकसृष्टिविज्ञानस्य उत्कर्षमस्ति। एतत् सूक्तं बहुदेवतावादात् एकेश्वरवादं प्रति वैदिकचिन्तनस्य यात्रां दर्शयति, यत्र सर्वस्य जगतः आधारः एकमात्रः परमेष्ठी प्रजापतिः एव सिद्धः भवति।

संक्षेपतः, देवीसूक्ते प्रतिपादितं सृष्टिरहस्यम् अद्वैत-चैतन्यस्य पराशक्तेश्च अभेदं स्थापयति। अत्र जगत् न मिथ्या नापि केवलं जडः पदार्थः, अपितु साक्षात् चितिशक्तेः स्फुरणम् अस्ति। वागाम्भृणीया एषा आत्मानुभूतिः ऋग्वेदस्य दार्शनिकचिन्तनस्य पराकाष्ठां प्रस्तौति यत्र जीवः ब्रह्मणा सह तादात्म्यं प्राप्य ब्रह्माण्डस्य उत्पत्ति-स्थिति-लयानां मूलकारणत्वं स्वात्मनि एव पश्यति।

Bibliography

- आप्टे , वामन शिवराम । *संस्कृत-हिन्दी-कोश*। दिल्ली ; मोतिलाल वनारसीदास पाब्लिसार्स प्राइभेड लिमिटेड । २य सं १९६९ । १म सं. १९६३ ।
- *उपनिषद् ग्रन्थावली* । सम्पा. स्वामी गम्भीरानन्द । कलकाता । उद्बोधन कार्यालय । ५र्थ सं. १९६४ , २३ संख्यक: पुन. मु. आगष्ट २०१६ (२य भाग)।
- *ऋग्वेद संहिता* – वं. अनु. रमेशचन्द्र दत्त । कलिकाता । ज्ञानभारती प्रकाशनी । पु. मु. रवीन्द्रवीथि, वैशाख, शकाब्द १९३७ ।
- *ऋग्वेद् संहिता*- श्रीमत् सायणाचार्यविरचितभाष्यसमेता (१- १० मण्डलात्मकः)। सम्पा. सोनटक्के इत्युपाह्व श्रीपादसूनुः नारायणशर्मा, काशीकारोपाह्वः गणेशसुनुः चिन्तामणिशर्मा । ३- ४ भागः । शके १८६८
- वन्दोपाध्याय,शान्ति । *वैदिक साहित्येर रूपरेखा* । कलकाता । आगष्ट, २००३ । १म मु. १९९३ ।
- वाहादुर,राजा राधाकान्तदेव । *शब्दकल्पद्रुमः* । दिल्ली;नाग-पाब्लिशर्स । पुनःप्रकाश १९८७ । ४र्थ काण्डः।
- *वेद संकलन* । सम्पा.उदयचन्द्र वन्दोपाध्याय । कलकाता । संस्कृत वुक डिपो । १म सं १४०२ वङ्गाब्द ,३य सं २००४ (१म. खण्ड), आगष्ट२००६ (२यखण्ड)